# Lambodara Stuti Asitavatsarakrita

# અસિતવત્સરકૃતા લમ્બોદરસ્તુતિઃ

## Document Information

Text title : Lambodara Stuti Asitavatsarakrita

File name : lambodarastutiHasitavatsarakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 10 | 5.10. 24-38||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 5, 2024

*sanskritdocuments.org*

# અસિતવત્સરકૃતા લમ્બોદરસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

અસિતવત્સરાવૂચતુઃ ।

લમ્બોદર નમસ્તુભ્યં સતતં યોગરૂપિણે ।

યોગાકારશરીરાય યોગશાન્તિપ્રદાયિને ॥ ૨૪॥

વિઘ્નેશાય મહાભક્તાનાં વિઘ્નહરણાય ચ ।

અભક્તાનાં મહાવિઘ્નકારિણે તે નમો નમઃ ॥ ૨૫॥

સ્વાનન્દવાસિને તુભ્યં સદા સ્વાનન્દદાયિને ।

મૂષકવાહનાયૈવ મૂષકધ્વજ વૈ નમઃ ॥ ૨૬॥

અનાથાય ગણેશાય સર્વેષાં નાથરૂપિણે ।

નાથાનાં નાથરૂપાય વિનાયક નમોઽસ્તુ તે ॥ ૨૭॥

હેરમ્બાય ચ સર્વેષાં માત્રે પિત્રે નમો નમઃ ।

જ્યેષ્ઠરાજાય જ્યેષ્ઠાય જ્યેષ્ઠાનાં જ્યેષ્ઠ તે નમઃ ॥ ૨૮॥

અમેયાયાઽપ્રેમયાયાઽનન્તખેલકરાય તે ।

અનન્તાનન્તરૂપાયાનન્તદાય નમો નમઃ ॥ ૨૯॥

સિદ્ધિબુદ્ધિપતે નાથ ભક્તસંરક્ષકાય ચ ।

નાનાશક્તિપ્રપાલાયાનન્તમાયાવિહારિણે ॥ ૩૦॥

ગજવક્ત્રાય સર્વેષામાદિપૂજ્યાય તે નમઃ ।

સર્વપૂજ્યાય સર્વેષાં સિદ્ધિદાય નમો નમઃ ॥ ૩૧॥

વક્રતુણ્ડાય વીરાય ચૈકદન્તાય તે નમઃ ।

મહોદરાય દેવાય દેવદેવેશ તે નમઃ ॥ ૩૨॥

અસુરાણાં સહાયાય નાનાવરપ્રદાય ચ ।

અસુરાણાં નિહન્ત્રે ત આસુરાય નમો નમઃ ॥ ૩૩॥

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મણાં બ્રહ્મવાદિને ।

બ્રહ્માકારાય વૈ ઢુણ્ઢે વેદવેદ્યાય તે નમઃ ॥ ૩૪॥

મનોવાણી વિહીનાય મનોવાણીમયાય ચ ।

યોગેશાય પરેશાય સર્વામયવિવર્જિત ॥ ૩૫॥
કિં સ્તુવસ્ત્વાં ગણાધીશ યત્ર શાન્તિં સમાગતાઃ ।
વેદા યોગીન્દ્રમુખ્યાશ્ચાસ્તુવન્તં પ્રણમાવહે ॥ ૩૬॥
એવં સ્તુતો ગણાધીશસ્તૌ જગાદ મહામુની ।
વરં સંવૃણુતં વિપ્રૌ દાસ્યામિ ભક્તિયન્ત્રિતઃ ॥ ૩૭॥
ભવદ્ભ્યાં યત્ કૃતં સ્તોત્રં તદેવ મે પ્રિયં ભવેત્ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં તથા મદ્ભક્તિદાયકમ્ ॥ ૩૮॥

ઇતિ અસિતવત્સરકૃતા લમ્બોદરસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૧૦ । ૫.૧૦। ૨૪-૩૮॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 10 . 5.10. 24-38..

Proofread by Yash Khasbage, Preeti Bhandare

*Lambodara Stuti Asitavatsarakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*